Digitized by Sarayu Trust Foundation Delhi and eGangotri

श्रीहरिः

श्रीलक्ष्मीसहस्रनामस्तोत्रम्

जहांगीराबाद २०२३९४

गीताप्रेस, गोरखपुर-बुलन्दशहर (उ०प्र०)

मूल्य पंद्रह पैसे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

K.K. Sharma Gaur
12.7.82

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीहरिः

श्रीलक्ष्मीसहस्रनामस्तोत्रम्

पं० प्रेम दत्त शास्त्री
जहांगीराबाद २०२३९४
बुलन्दशहर (उ०प्र०)

गीताप्रेस, गोरखपुर

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.
मुद्रक तथा प्रकाशक—मोतीलाल जालान, गीताप्रेस, गोरखपुर

[भारत-सरकार द्वारा उपलब्ध कराये गये रियायती मूल्यके कागजपर मुद्रित]

सं०	२०१६	से	२०३४ तक	३५,०००
सं०	२०३८	षष्ठ	संस्करण	२०,०००
			कुल	५५,०००

मूल्य पंद्रह पैसे

पता—गीताप्रेस, पो० गीताप्रेस (गोरखपुर)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पं० प्रेम दत्त शास्त्री
जहांगीराबाद २०२३६४
बुलन्दशहर (उ०प्र०)

श्रीहरिः

श्रीलक्ष्मीसहस्रनामस्तोत्रम्

श्रीः पद्मा प्रकृतिः सत्त्वा शान्ता चिच्छक्तिरव्यया ।
केवला निष्कला शुद्धा व्यापिनी व्योमविग्रहा
व्योमपद्मकृताधारा परा व्योमामृतोद्भवा ।
निर्व्योमा व्योममध्यस्था पञ्चव्योमपदाश्रिता

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अच्युता व्योमनिलया परमानन्दरूपिणी ।
नित्यशुद्धानित्यतृप्तानिर्विकारा निरीक्षणा ॥
ज्ञानशक्तिः कर्तृशक्तिर्भोक्तृशक्तिः शिवावहा ।
स्नेहाभासा निरानन्दा विभूतिर्विमला चला ॥४॥
अनन्ता वैष्णवी व्यक्ता विश्वानन्दा विकाशिनी ।
शक्तिर्विभिन्नसर्वार्तिः समुद्रपरितोषिणी ॥५॥
मूर्तिः सनातनी हार्द्दा निस्तरङ्गा निरामया ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ज्ञानज्ञेयाज्ञानगम्याज्ञानज्ञेयविकाशिनी ॥६॥
स्वच्छन्दशक्तिर्गहनानिष्कम्पार्चिः सुनिर्मला।
स्वरूपा सर्वगा पारा बृंहिणी सुगुणोर्जिता ॥७॥
अकलङ्का निराधारा निस्संकल्पा निराश्रया।
असंकीर्णा सुशान्ता च शाश्वती भासुरी स्थिरा
अनौपम्या निर्विकल्पा नियन्त्रा यन्त्रवाहिनी
अभेद्या भेदिनी भिन्ना भारती वैखरी खगा ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri

अग्राह्या ग्राहिका गूढा गर्भारा विश्वगोपिनी ।
अनिर्देश्या प्रतिहता निर्बीजा पावनी परा १० ।
अप्रतर्क्यापरिमिता भवभ्रान्तिविनाशिनी ।
एका द्विरूपा त्रिविधा असंख्यातासुरेश्वरी ११
सुप्रतिष्ठा महाधात्री स्थितिर्वृद्धिर्ध्रुवा गतिः ।
ईश्वरी महिमा ऋद्धिः प्रमोदा उज्ज्वलोद्यमा ॥
अक्षया वर्द्धमाना च सुप्रकाशा विहङ्गमा ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नीरजा जननी नित्या जया रोचिष्मती शुभा॥
तपोनुदा च ज्वाला च सुदीप्तिश्चांशुमालिनी ।
अप्रमेया त्रिधा सूक्ष्मा परा निर्वाणदायिनी ॥
अवदाता सुशुद्धा च अमोघाख्या परम्परा ।
संधानकी शुद्धविद्या सर्वभूतमहेश्वरी ॥१५॥
लक्ष्मीस्तुष्टिर्महाधीरा शान्तिरापूरणेन वा ।
अनुग्रहाशक्तिराद्या जगज्ज्येष्ठा जगद्विधिः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सत्या प्रज्ञा क्रिया योग्या अपर्णा ह्लादिनी शिवा ।
सम्पूर्णा ह्लादिनी शुद्धा ज्योतिष्मत्यमृतावहा ॥
रजोवत्यर्कप्रतिभाऽऽकर्षिणी कर्षिणी रसा ।
परावसुमती देवा कान्तिः शान्तिर्मतिः कला ॥
कला कलङ्करहिता विशालोद्दीपनी रतिः ।
सम्बोधिनी हारिणी च प्रभावा भवभूतिदा ॥
अमृतस्यन्दिनी जीवा जननी खण्डिका स्थिरा ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

धूमा कलावती पूर्णा भासुरा सुमतीरसा ॥२०॥
शुद्धा ध्वनिः स्मृतिः सृष्टिर्विकृतिः कृष्टिरेव च ।
प्रापणी प्राणदा प्रज्ञा विश्वा पाण्डुरवासिनी ॥
अवनिर्वज्रनालिका चित्रा ब्रह्माण्डवासिनी ।
अनन्तरूपानन्तात्मानन्तस्थानन्तसम्भवा ॥
महाशक्तिः प्राणशक्तिः प्राणदात्री रतिम्भरा ।
महासमूहा निखिला इच्छाधारा सुखावहा ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रत्यक्षलक्ष्मीर्निष्कम्पा प्रोहाबुद्धिगोचरा ।
नानादेहा महावर्ता बहुदेहविकासिनी ॥२४॥
सहस्राणी प्रधाना च न्यायवस्तुप्रकाशिका ।
सर्वाभिलाषपूर्णेच्छा सर्वा सर्वार्थभाविणी ॥
नानास्वरूपचिद्धात्री शब्दपूर्वा पुरातना ।
व्यक्ताव्यक्ता जीवकेशा सर्वेच्छापरिपूरिता ॥
संकल्पसिद्धा सांख्येया तत्त्वगर्भा धरावहा ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भूतरूपा चित्स्वरूपा त्रिगुणा गुणगर्विता। २७।
प्रजापतीश्वरी रौद्री सर्वाधारा सुखावहा ।
कल्याणवाहिका कल्या कलिकल्मषनाशिनी
नीरूपोच्छिन्नसंतानासुयन्त्रा त्रिगुणालया ।
महामाया योगमाया महायोगेश्वरी प्रिया ॥
महास्त्री विमला कीर्तिर्जया लक्ष्मीर्निरञ्जना ।
प्रकृतिर्भगवन्माया शक्तिर्निद्रा यशस्करी ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चिन्ताबुद्धिर्यशः प्राज्ञाशान्तिराप्रीतिवर्द्धिनी ।
प्रद्युम्नमाता साध्वी च सुखसौभाग्यसिद्धिदा ॥
काष्ठा निष्ठा प्रतिष्ठा च ज्येष्ठा श्रेष्ठा जयावहा ।
सर्वातिशायिनी प्रीतिर्विश्वशक्तिर्महाबला ॥
वरिष्ठा विजया वीरा जयन्ती विजयप्रदा ।
हृद् गृहा गोपिनी गुह्या गणगन्धर्वसेविता ॥ ३३ ॥
योगीश्वरी योगमाया योगिनी योगसिद्धिदा ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

महायोगेश्वरवृता योगा योगेश्वरप्रिया ॥३४॥
ब्रह्मेन्द्ररुद्रनमिता सुरासुरवरप्रदा ।
त्रिवर्त्मगा त्रिलोकस्था त्रिविक्रमपदोद्भवा ३५
सुतारा तारिणी तारा दुर्गा संतारिणी परा ।
सुतारिणी तारयन्ती भूरितारेश्वरप्रभा ॥३६॥
गुह्यविद्या यज्ञविद्या महाविद्या सुशोभिता ।
अध्यात्मविद्याविद्येशी पद्मस्था परमेष्ठिनी ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आन्वीक्षिकी त्रयीवार्ता दण्डनीतिर्नयात्मिका ।
गौरी वागीश्वरी गोप्त्री गायत्री कमलोद्भवा ॥
विश्वम्भरा विश्वरूपा विश्वमाता वसुप्रदा ।
सिद्धिः स्वाहा स्वधा स्वस्तिः सुधा सर्वार्थसाधिनी ॥
इच्छा सृष्टिर्द्युतिर्भूतिः कीर्तिः श्रद्धा दयामतिः ।
श्रुतिर्मेधा धृतिर्ह्रीः श्रीर्विद्या विबुधवन्दिता ४०
अनसूया घृणा नीतिर्निर्वृतिः कामधुक्करा ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रतिज्ञा संततिर्भूतिर्द्यौः प्रज्ञा विश्वमानिनी ४१
स्मृतिर्वाग्विश्वजननीपश्यन्तीमध्यमा समा ।
संध्या मेधा प्रभा भीमा सर्वाकारा सरस्वती ४२
काङ्क्षा माया महामाया मोहिनी माधवप्रिया ।
सौम्या भोगा महाभोगा भोगिनी भोगदायिनी
सुधौतकनकप्रख्या सुवर्णकमलासना ।
हिरण्यगर्भा सुश्रोणी हारिणी रमणी रमा ।४४।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चन्द्रा हिरण्मयी ज्योत्स्ना रम्या शोभा शुभावहा ।
त्रैलोक्यमण्डना नारी नरेश्वरवरार्चिता ॥४५॥
त्रैलोक्यसुन्दरी रामा महाविभववाहिनी ।
पद्मस्था पद्मनिलया पद्ममालाविभूषिता ।४६।
पद्मयुग्मधरा कान्ता दिव्याभरणभूषिता ।
विचित्ररत्नमुकुटा विचित्राम्बरभूषणा ॥४७॥
विचित्रमाल्यगन्धाढ्या विचित्रायुधवाहना ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

महानारायणी देवी वैष्णवी वीरवन्दिता ॥४८॥
कालसंकर्षिणी घोरा तत्त्वसंकर्षिणी कला ।
जगत्सम्पूरणी विश्वा महाविभवभूषणा ॥४९॥
वारुणी वरदा व्याख्या घण्टाकर्णविराजिता ।
नृसिंही भैरवी ब्राह्मी भास्करी व्योमचारिणी ॥
ऐन्द्री कामधेनुः सृष्टिः कामयोनिर्महाप्रभा ।
दृष्टा काम्या विश्वशक्तिर्बीजगत्यात्मदर्शना ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गरुडारूढहृदया चान्द्री श्रीर्मधुराननाः ।
महोग्ररूपा वाराही नारसिंही हतासुरा ॥५२॥
युगान्तहुतभुग्ज्वाला कराला पिङ्गला कला ।
त्रैलोक्यभूषणा भीमा श्यामा त्रैलोक्यमोहिनी
महोत्कटा महारक्ता महाचण्डा महासना ।
शङ्खिनी लेखिनी स्वस्थालिखिता खेचरेश्वरी ॥
भद्रकाली चैकवीरा कौमारी भवमालिनी ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कल्याणी कामधुग्ज्वालामुखी चोत्पलमालिका ॥
बालिका धनदा सूर्या हृदयोत्पलमालिका ।
अजिता वर्षिणी रीतिर्भरुण्डा गरुडासना ।५६।
वैश्वानरी महामाया महाकाली विभीषणा ।
महामन्दारविभवा शिवानन्दा रतिप्रिया ।५७।
उर्द्धातिः पद्ममाला च धर्मवेगा विभावनी ।
सत्क्रिया देवसेना च हिरण्यरजताश्रया ॥५८॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सहसावर्तमाना च हस्तिनादप्रबोधिनी ।
हिरण्यपद्मवर्णा च हरिभद्रा सुदुर्द्धरा ॥५९॥
सूर्य्या हिरण्यप्रकटसदृशी हेममालिनी ।
पद्मानना नित्यपुष्टा देवमाता मृतोद्भवा॥६०॥
महाधना च या शृङ्गी कार्द्दमी कम्बुकन्धरा ।
आदित्यवर्णा चन्द्राभा गन्धद्वारा दुरासदा ६१
वराचिता वरारोहा वरेण्या विष्णुवल्लभा ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कल्याणी वरदा वामा वामेशी विन्ध्यवासिनी ।
योगनिद्रा योगरता देवकी कामरूपिणी ।
कंसविद्राविणी दुर्गा कौमारी कौशिकी क्षमा ६३
कात्यायनी कालरात्रिर्निशितृप्ता सुदुर्जया ।
विरूपाक्षी विशालाक्षी भक्तानां परिरक्षिणी ६४
बहुरूपा स्वरूपा च विरूपा रूपवर्जिता ।
घण्टानिनादबहुला जीमूतध्वनिनिःस्वना ६५

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

महादेवेन्द्रमथिनी भ्रुकुटीकुटिलानना ।
सत्योपयाचिता चैका कौबेरी ब्रह्मचारिणी ६६
आर्या यशोदा सुतदा धर्मकामार्थमोक्षदा ।
दारिद्र्यदुःखशमनी घोरदुर्गार्तिनाशिनी ६७
भक्तार्तिशमनी भव्या भवभर्गापहारिणी ।
क्षीराब्धितनया पद्मा कमला धरणीधरा ॥६८॥
रुक्मिणी रोहिणी सीता सत्यभामा यशस्विनी ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रज्ञाधारामितप्रज्ञा वेदमाता यशोवती ॥६९॥
समाधिर्भाविना मैत्री करुणा भक्तवत्सला ।
अन्तर्वेदी दक्षिणा च ब्रह्मचर्यपरा गतिः ।७०।
दीक्षा वीक्षा परीक्षा च समीक्षा वीरवत्सला ।
अम्बिका सुरभिः सिद्धा सिद्धविद्याधरार्चिता ॥
सुदीक्षा लेलिहाना च कराला विश्वपूरका ।
विश्वसंधारिणी दीप्तिस्तापनी ताण्डवप्रिया७२

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

उद्भवा विरजा राज्ञी तापनी बिन्दुमालिनी ।
क्षीरधारा सुप्रभावा लोकमाता सुवर्चसा ॥७३॥
हव्यगर्भा चाज्यगर्भा जुह्वतो यज्ञसम्भवा ।
आप्यायनी पावनी च दहनी दहनाश्रया ।७४।
मातृका माधवी मुख्या मोक्षलक्ष्मीर्महर्द्धिदा ।
सर्वकामप्रदा भद्रा सुभद्रा सर्वमङ्गला ॥७५॥
श्वेता सुशुक्लवसना शुक्लमाल्यानुलेपना ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हंसाहीनकरी हंसी हृद्या हृत्कमलालया॥७६॥
सितातपत्रा सुश्रोणी पद्मपत्रायतेक्षणा।
सावित्री सत्यसंकल्पा कामदाकामकामिनी॥
दर्शनीया दृशा दृश्या स्पृश्या सेव्या वराङ्गना
भोगप्रिया भोगवती भोगीन्द्रशयनासना ७८
आर्द्रा पुष्करिणी पुण्या पावनी पापसूदनी।
श्रीमती च शुभाकारा परमैश्वर्यभूतिदा॥७९॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अचिन्त्यानन्तविभवा भवभावविभावनी ।
निश्रेणिः सर्वदेहस्था सर्वभूतनमस्कृता ॥८०॥
बला बलाधिका देवी गौतमी गोकुलालया ।
तोषिणी पूर्णचन्द्राभा एकानन्दा शताननना ८१
उद्याननगरद्वारहर्म्योपवनवासिनी ।
कूष्माण्डा दारुणा चण्डा किराती नन्दनालया
कालायना कालगम्या भयदा भयनाशिनी ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सौदामनी मेघरवा दैत्यदानवमर्द्दिनी ॥८३॥
जगन्मातामयकरी भूतधर्त्री सुदुर्लभा ।
काश्यपी शुभदाता च वनमाला शुभा वरा ८४
धन्या धन्येश्वरी धन्या रत्नदा वसुवर्द्धिनी ।
गान्धर्वी रेवती गङ्गा शकुनी विमलानना ८५
इडा शान्तिकरी चैव तामसी कमलालया ।
आज्यपा वज्रकौमारी सोमपा कुसुमाश्रया ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जगत्प्रया च सरथा दुर्जया खगवाहना ।
मनोभवा कामचारा सिद्धचारणसेविता ॥८७॥
व्योमलक्ष्मीर्महालक्ष्मीस्तेजोलक्ष्मीः सुजाज्वला ।
रसलक्ष्मीर्जगद्योनिर्गन्धलक्ष्मीर्विनाश्रया ८८
श्रवणा श्रावणी नेत्री रसनाप्राणचारिणी ।
विरिञ्चिमाता विभवा वरवारिजवाहना ॥८९॥
वीर्या वीरेश्वरी वन्द्या विशोका वसुवर्द्धनी ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अनाहता कुण्डलिनी नलिनी वनवासिनी ९०
गान्धारिणीन्द्रनमिता सुरेन्द्रनमिता सती ।
सर्वमङ्गल्यमाङ्गल्यासर्वकामसमृद्धिदा ।९१।
सर्वानन्दा महानन्दा सत्कीर्तिः सिद्धसेविता ।
सिनीवाली कुहू राका अमा चानुमतिर्द्युतिः ॥
अरुन्धती वसुमती भार्गवी वास्तुदेवता ।
मायूरी वज्रवेताली वज्रहस्ता वरानना ॥९३॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अनघा धरणिर्धीरा धमनी मणिभूषणा ।
राजश्री रूपसहिता ब्रह्मश्रीर्ब्रह्मवन्दिता ॥९४॥
जयश्रीर्जयदा ज्ञेया सर्गश्रीः स्वर्गतिः सताम् ।
सुपुष्पा पुष्पनिलया फलश्रीर्निष्कलप्रिया ९५
धनुर्लक्ष्मीस्त्वमिलिता परक्रोधनिवारिणी ।
कद्रूर्दनायुः कपिला सुरसा सुरमोहिनी ॥९६॥
महाश्वेता महानीला महामूर्तिर्विषापहा ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सुप्रभा ज्वालिनी दीप्तिस्तृप्तिव्याप्तिप्रभाकरी ।
तेजोवती पद्मबोधा मदलेखारुणावती ।
रत्ना रत्नावली भूता शतधामा शतापहा ।९८।
त्रिगुणा घोषिणी रक्ष्या नर्हिनी घोषवर्जिता ।
साध्यादितिर्दितिर्देवी मृगवाहा मृङ्गाङ्गगा ।९९।
चित्रनीलोत्पलगता वृषरत्नकराश्रया ।
हिरण्यरजतद्वन्द्वा शङ्खभद्रासनस्थिता ।१००।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गोमूत्रगोमयक्षीरदधिसर्पिर्जलाश्रया ।
मरीचिश्चीरवसना पूर्णा चन्द्रार्कविष्टरा १०१।
सुसूक्ष्मा निर्वृतिः स्थूला निवृत्तारातिरेव च ।
मरीचिर्ज्वालिनी धूम्रा हव्यवाहा हिरण्यदा ॥
दायिनी कालिनी सिद्धिः शोषिणी सम्प्रबोधिनी ।
भास्वरा संहतिस्तीक्ष्णा प्रचण्डज्वलनोज्ज्वला
साङ्गा प्रचण्डा दीप्ता च वैद्युतिः सुमहाद्युतिः ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कपिला नीलरक्ता च सुषुम्णा विस्फुलिङ्गिनी ॥
अर्चिष्मती रिपुहरा दीर्घा धूमावली जरा ।
सम्पूर्णमण्डला पूषा स्रंसिनी सुमनोहरा १०५
जया पुष्टिकरीच्छाया मानसाह्लदयोज्ज्वला ।
सुवर्णकरणी श्रेष्ठा मृतसंजीवनी रणे ॥१०६॥
विशल्यकरणी शुभ्रा संधिनी परमौषधेः ।
ब्राह्मिष्ठा ब्रह्मसहिता ऐन्दवी रत्नसम्भवा १०७

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विद्युत्प्रभा बिन्दुमती त्रिस्वभावगुणाम्बिका ।
नित्योदिता नित्यहृष्टा नित्यकामकरीषिणी ॥
पद्माङ्का वज्रचिह्ना च वक्रदण्डविभासिनी ।
विदेहपूजिता कन्या माया विजयवाहिनी १०९
मानिनी मङ्गलामान्या मानिनी मानदायिनी
विश्वेश्वरी गणवती मण्डला मण्डलेश्वरी ॥
हरिप्रिया भौमसुता मनोज्ञा मतिदायिनी ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रत्यङ्गिरा सोमगुप्ता मनोऽभिज्ञा वदन्मतिः ॥
यशोधरा रत्नमाला कृष्णा त्रैलोक्यबन्धनी ।
अमृता धारिणी हर्षा विनता वल्लकी शची ।
संकल्पा भामिनी मिश्रा कादम्बर्यमृता प्रभा ।
अगता निर्गता वज्रा सुहिता सहिताक्षता ११३
सर्वार्थसाधनकरी धातुर्धारणिकामला ।
करुणाधारसम्भूता कमलाक्षी शशिप्रिया ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सौम्यरूपा महादीप्ता महाज्वाला विकाशिनी।
माला काञ्चनमाला च सद्भुजा कनकप्रभा ॥
प्राक्रिया परमा योक्त्री क्षोभिका च सुखोदया ।
विजृम्भणा च वज्राख्या शृङ्खला कमलेक्षणा ॥
जयंकरी मधुमती हरिता शशिनी शिवा ।
मूलप्रकृतिरीशानी योगमाता मनोजवा ११७
धर्मोदया भानुमती सर्वाभासा सुखावहा ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

धुरन्धरा च बाला च धर्मसेव्या तथागता ११८
सुकुमारा सौम्यमुखी सौम्यसम्बोधनोत्तमा।
सुमुखी सर्वतोभद्रा गुह्यशक्तिर्गुहालया।११९।
हलायुधा चैकवीरा सर्वशस्त्रसुधारिणी।
व्योमशक्तिर्महादेहा व्योमगा मधुमन्मयी॥
गङ्गा वितस्ता यमुना चन्द्रभागा सरस्वती।
तिलोत्तमोर्वशी रम्भा स्वामिनी सुरसुन्दरी॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

बाणप्रहरणा बाला बिम्बोष्ठी चारुहासिनी ।
ककुभिनी चारुपृष्ठा दृष्टा दृष्टफलप्रदा ॥ १२२ ॥
काम्याचरी च काम्या च कामाचारविहारिणी ।
हिमशैलेन्द्रसंकाशागजेन्द्रवरवाहना ॥ १२३ ॥
अशेषसुखसौभाग्यसम्पदां योनिरुत्तमा ।
सर्वोत्कृष्टा सर्वमयी सर्वा सर्वेश्वरप्रिया । १२४ ।
सर्वाङ्गयोनिः साव्यक्ता सम्प्रधानेश्वरेश्वरी ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विष्णुवक्षःस्थलगता किमतः परमुच्यते ॥ २५ ॥
परा निर्महिमा देवी हरिवक्षःस्थलाश्रया ।
सा देवी पापहन्त्री च सांनिध्य कुरुतान्मम ॥
इति नाम्नां सहस्रं तु लक्ष्म्याः प्रोक्तं शुभावहम्
परावरेण भेदेन मुख्यगौणेन भागतः ॥ १२७ ॥
यश्चैतत् कीर्तयेन्नित्यं शृणुयाद् वापि पद्मज ।
शुचिः समाहितो भूत्वा भक्तिश्रद्धासमन्वितः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीनिवासं समभ्यर्च्य पुष्पधूपानुलेपनैः ।
भोगैश्च मधुपर्काद्यैर्यथाशक्ति जगद्गुरुम् ॥
तत्पार्श्वस्थां श्रियं देवीं सम्पूज्य श्रीधरप्रियाम् ।
ततो नामसहस्रेण तोषयेत् परमेश्वरीम् १३०
नामरत्नावलीस्तोत्रमिदं यः सततं पठेत् ।
प्रसादाभिमुखीलक्ष्मीः सर्वं तस्मै प्रयच्छति ॥
यस्या लक्ष्म्याश्चसम्भूताः शक्तयो विश्वगाः सदा।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कारणत्वे न तिष्ठन्ति जगत्यस्मिंश्चराचरे १३२।
तस्मात् प्रीता जगन्माता श्रीर्यस्याच्युतवल्लभा
सुप्रीताः शक्तयस्तस्य सिद्धिमिष्टां दिशन्ति हि
एक एव जगत्स्वामी शक्तिमानच्युतः प्रभुः ।
तदंशशक्तिमन्तोऽन्ये ब्रह्मेशानादयो यथा ॥
तथैवैका परा शक्तिः श्रीस्तस्य करुणाश्रया ।
ज्ञानादिषाड्गुण्यमयी या प्रोक्ता प्रकृतिः परा ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एकैव शक्तिः श्रीस्तस्या द्वितीयात्मनि वर्तते ।
परा परेशी सर्वेशी सर्वाकारा सनातनी ।।३६
अनन्तनामधेया च शक्तिचक्रस्य नायिका ।
जगच्चराचरमिदं सर्वं व्याप्य व्यवस्थिता ।।३७
तस्मादेकैव परमा श्रीर्ज्ञेया विश्वरूपिणी ।
सौम्या सौम्येन रूपेण संस्थिता नटजीवत् ।।
यो यो जगति पुम्भावः स विष्णुरिति निश्चयः ।
या या तु नारीभावस्था तत्र लक्ष्मीर्व्यवस्थिता

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रकृतेः पुरुषाच्चान्यस्तृतीयो नैव विद्यते ।
अथ किं बहुनोक्तेन नरनारीमयो हरिः ।१४०।
अनेकभेदभिन्नस्तु क्रियते परमेश्वरः ।
महाविभूतिं दयितां ये स्तुवन्त्यच्युताप्रियाम् ॥
ते प्राप्नुवन्ति परमां लक्ष्मीं संशुद्धचेतसः ।
पद्मयोनिरिदं प्राप्य पठन् स्तोत्रमिदं क्रमात् ॥
दिव्यमष्टगुणैश्वर्यं तत्प्रसादाच्च लब्धवान् ।
सकामानां च फलदामकामानां च मोक्षदाम् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पुस्तकाख्यां भयत्रार्त्तीं सितवस्त्रां त्रिलोचनाम्
महापद्मनिषण्णां तां लक्ष्मीमजरतां नुमः ।
करयुगलगृहीतं पूर्णकुम्भं दधाना
कचिदमलगतस्था शङ्खपद्माक्षपाणिः ।
कचिदपि दयिताङ्गे चामरव्यग्रहस्ता
कचिदपि मणिपाशं बिभ्रती हेमकान्तिः ॥

इत्यादिब्रह्मपुराणे काश्मीरवर्णने हिरण्यगर्भहृदये सर्वकामप्रदायकं
पुरुषोत्तमप्रोक्तं लक्ष्मीसहस्रनामस्तोत्रं समाप्तम् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पं० प्रेम दत्त शास्त्री
जहांगीराबाद २०२३६४
बुलन्दशहर (उ०प्र०)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पं० प्रेम दत्त शास्त्री
जहांगीराबाद २ २०४

मिलनेका पता—

गीताप्रेस, पो० गीताप्रेस (गोरखपुर)

पं० प्रेम दत्त शास्त्री
जहांगीराबाद २ २०४

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection